No. ४३०५-घ

Title बालप्रकाशद्वादशाध्यायः

Author

Extent ४ Age

Subject

नं० ४३०५-घ
बालप्रकाशद्वादशाध्यायः
पत्राणि ४ (चत्वारि)

कालप्रकास

५६



वा.ल. द्वा.
वाक्यभे.

श्रीगणेशाय नमः॥ ॥अथ द्वादशलक्षण्यां विप्रकीर्णा इतस्ततः। वाक्यभेदभिदाः सर्वाः संक्षिप्येह ब्रू
वीम्यहं। तत्र त्रिविधस्तावद्वाक्यभेदः। आवृत्तिलक्षणो विभागलक्षणो वैरूप्यलक्षणश्चेति। आवृत्ति
लक्षणोपि त्रिविधः प्रकृत्यावृत्तिः प्रत्ययावृत्तिरुभयावृत्तिश्चेति। प्रकृत्यावृत्तिरपि द्विविधा। प्रातिपदि
कावृत्तिर्धात्वावृत्तिश्चेति। प्रातिपदिकावृत्तिरपि द्विविधा· समासासमासभेदात्। प्रत्ययावृत्तिरपि च
तुर्विधा· सुप्तिङ्कृत्तद्धितभेदात्। तदुक्तमर्थैकत्वादेकं वाक्यमित्यत्र वार्तिके। पदतदेकदेशतत्समुदा
वृत्तिप्रसंगात्मकत्वाद्विभागलक्षणो वा वाक्यभेद इति। तथा· विभागलक्षणो गम्यमानसंबंधसागोने
२ काद्दृष्टकल्पना च दोषः। इतरेत्रावृत्तेरवेदत्वादप्रामाण्यमिति। एतद्व्याख्यातं भट्टसोमेश्वरेण। वाजपे एम०
यगुणविधावाख्यातपदावृत्तिर्ग्रहे कर्तव्यविवक्षायां पदैकदेशप्रातिपदिकावृत्तिर्हविरार्तेरुभयत्वे १
न विशेषणोहविरार्तिमाच्छेदितिपदसमुदायावृत्तिरारुण्यस्य कृत्स्नप्रकरणनिवेशोरुणायेतिपदस्य

पिंगास्यादिवाक्याद्विभाग इति। विभागलक्षणावाक्यभेदस्य त्ववांतरभेदान् संतीति नोक्ताः। वैरूप्य
लक्षणोपि वाक्यभेदोनेकविधः। वैरूप्यभेदात्। तत्र वैरूप्यं त्रिविधं प्रकृतौ प्रत्यये वाक्ये चेति। आग्नेवा
जपेयगुणविधिप्रसेयजो। कर्मत्वकरणत्वरूपमुद्देश्यत्वोपादेयत्वरूपं गुणत्वप्रधानत्वरूपं विधेय
त्वानुवादत्वरूपं चेति चतुर्विधं द्वितीयं ग्रहमित्येकत्वस्य संमार्गं ग्रहं वा प्रति गुणत्वे द्वितीयाविभक्त्या
लस्येग्रहापेक्षयाप्राधान्यस्यापि श्रौतत्वात्। तृतीयं तु अरुणयेत्यत्र तृतीयया करणीभूतामेकहाय
नीमुद्दिश्यारुणप्रातिपदिकार्थविधौ भिन्नपदोपात्तायामप्येकहायन्या एकवाक्ये वैरूप्यं। तथान्यान्य
पि नानाविधानि वैरूप्याण्यूह्यंते। अ भ्य प्रतिग्र हेष्टे लौकिकवैदिकोभयविधो निमित्तकत्वे क्रत्वर्थ
त्वपुरुषार्थत्ववैरूप्यं। षष्ठचतुर्थैकादशे च। तत्र द्वितीयः सत्रायागुरते सविश्वजितायजेते। ति विश्वजि
तः सत्रे प्रवृत्तमप्रवृत्तं च प्रति साधारणेन विधौ प्रवृत्तं प्रति क्रत्वर्थत्वादप्रवृत्तं च प्रति पुरुषार्थत्वा

बालः द्वा
नामयू पं.

द्वैरूप्यं स्यादित्युक्तं। तथावघातस्यौषधसान्नाय्यार्थत्वे दृष्टादृष्टार्थत्वे वैरूप्यं। तथा सोमवमने इष्टे
लौकिकवैदिकसोमवमननिमित्तकत्वेपेक्षितानपेक्षितविधिवैरूप्यं। तथा सर्वोद्गात्त्वेनेयः सत्राया
गुरत इत्यत्रापि। तथा षष्ठेभ्युदितेष्टौ नं दुग्धविवक्षायां दधिशृतयोर्देवतानपनयाद्देवताविधावाकां
३ क्षितानाकांक्षितविधिवैरूप्यं [illegible] तथा मातुलकन्यापरिणयने स्मृत्साचारानुत्सबलत्वे दोषजनक
त्वाजनकत्वविरोधाद्बलत्वे वैरूप्यं। इदं च विधिभेदादावसंभावेपि वैरूप्यप्रसंगादुदाहृतं। तथान्यदपीदृ
शमेव वैश्वदेवस्यान्नसंस्कारकर्मत्वे पुरुषार्थत्वे चैकमेव कर्म प्र[illegible]कमेवान्नं द्रव्यं गुणभूतं प्रधानभू ति ए
तं चेति। तथाक्रुस्सलचरौ हूते श्रपयतीति श्रपणप्रतिप्रसवहत नियमविधिवैरूप्यं। तथा श्यामप्रपिष्ट एम०
भागा इति पेषणस्य चरुपशुपुरोडाशार्थत्वे चरौ प्रतिप्रसवात्पशुपुरोडाशयोश्चापूर्वविधित्वाद्वैरूप्यं
तथा नवमे पत्नीसंयाजान्तान्यहानि सत्राण्येवं विधिनियमविधिवैरूप्यादंतादवर्जं प्रवृत्तिरित्युक्तं। २

तथाग्रहैकत्वविवक्षायामप्येवं विधिपरिसंख्यावैरूप्यं। तथोभयार्थ्यधिकरणेपि तथा दशमन्तेतोयोपां
त्येसोमचमसोदक्षिणोत्तरैकवाक्यत्वे सोमचमस एवेति नियमात्सब्रह्मण एवेति परिसंख्यापत्तेश्च
वैरूप्यं। तथा नित्यानित्यसंयोगविरोधात्मकं च वैरूप्यं। तदपि स्वरूपे द्वारे वा आद्यं संस्थासामान्यविध्ये।।
द्वितीयं फलचमसस्सामान्यविध्याधिकरणे। तथा षष्ठे तुर्यार्थे एकस्यैवोपलक्ष्योपलक्षणत्ववैरूप्यं।
तत्र हि होमार्थचतुरवत्तनाशे शेषादेव पुनरवदेयं यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आ
ज्येनैता देवताः परिसंख्याय यजेतेति हविर्नाशनिमित्तविहितत्वाज्ज्यानिःशेषनष्टे हविष्युत्तमायां तु पुरो
डाशान्तरे सादने प्रसक्ते हविर्नाशनिमित्तविहिताज्येन यष्टव्यमिति संशय्य एवं कोटिद्वयपक्षीकृतसंसि
द्धेति तं तत्र रत्ने। कृत्स्नस्याविकृतस्य पुरोडाशस्य मध्यपूर्वार्धेश्व दानोपलक्षणमिसेव शास्त्रार्थः
कृत्स्नस्यैव शास्त्रवेलायां प्रकृतत्वात्। इतरथा यदि कृत्स्नपुरोडाशमध्यपूर्वार्धलक्षितमवदानद्वयं

शास्त्रार्थ इति न गतस्वेतत्ततोऽवदाननाशे सति इतरत्सर्वमवशिष्टं तस्योपलक्षणानां नाशेन सति तदे
वोपलक्षणाभ्यक्तमेवाशिष्टं पुनरवदीयमानमुपलक्ष्यं प्रसज्येतेति वैरूप्यं शास्त्रस्य स्यात्। एकरूपेण
च शास्त्रेणाभाव्यं। तस्मादपादानत्ववाचि पंचमीबलाद्धागांगाभ्यक्तमवदानोपलक्षणमेवेतरत्वान्नातु
स्वयं यागांगाभ्यक्तमुपलक्ष्यमिति॥ ॥ नयाविधिप्रत्ययेपि विभ्रमनुवाद वैरूप्यं। तद्यथा द्वितीये वायव्यं
श्वेतमालभेत सौर्यं चरुं निर्वपेदिति दार्शपौर्णमासिका वीर्षमालभेत चतुरो मुष्टीन्निर्वपतीत्यालं त्या
भनिर्वापावनूद्य श्वेतचरुगुणौ विधीयेते वा पश्वमितीषाव्रसप्रभवत्वाद्धूसस्य च वायुसंबंधा या
त्सौर्यमिति च चरोः स्यात्सात्तेजस्वित्वेन सूर्यसादृश्यात्कथंचिदनुवाद इति पूर्वपक्षिते आलंभनिर्वा
पयोर्लोकेपि सत्वेन अभिचारान्न दार्शपौर्णमासिकयोरेवोपस्थितिः संभवतीति सिद्धांतितेनोक्तेलिङ्ग एम.
विहितौ या वालंभनिर्वापाविति विशेषणान्नायं दोषः शंकाः एवं तर्हि लिङ्गेनानुवादकत्वाद्गुणाबि ३

बाल॰ द्वा॰
पाक्यु भ॰

५

धिर्न लभ्यते उभयाश्रयणे च युगपद्विध्यनुवादविरोध इत्युक्तरितमिति॥ ॥इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीमद्भट्टनारायणात्मजभट्टशंकरकृते मीमांसाबालप्रकाशे द्वादशाध्यायसंग्रहः॥ ॥

राम
८

